# ॥ वाल्मीकि रामायण॥

## ५ सुन्दरकाण्ड

### अध्याय ६३

ततः प्रस्रवणं शैलं ते गत्वा चित्रकाननम् ।
प्रणम्य शिरसा रामं लक्ष्मणं च महाबलम् ॥१॥

युवराजं पुरस्कृत्य सुग्रीवमभिवाद्य च ।
प्रवृत्तमथ सीतायाः प्रवक्तुमुपचक्रमुः ॥२॥

रावणान्तःपुरे रोधं राक्षसीभिश् च तर्जनम् ।
रामे समनुरागं च यश्चापि समयः कृतः ॥३॥

एतदाख्यान्ति ते सर्वे हरयो राम संनिधौ ।
वैदेहीमक्षतां श्रुत्वा रामस्तूत्तरमब्रवीत् ॥४॥

क्व सीता वर्तते देवी कथं च मयि वर्तते ।
एतन्मे सर्वमाख्यात वैदेहीं प्रति वानराः ॥५॥

रामस्य गदितं श्रुत्व हरयो रामसंनिधौ ।
चोदयन्ति हनूमन्तं सीतावृत्तान्तकोविदम् ॥६॥

श्रुत्वा तु वचनं तेषां हनूमान्मारुतात्मजः ।
उवाच वाक्यं वाक्यज्ञः सीताया दर्शनं यथा ॥७॥

समुद्रं लङ्घयित्वाहं शतयोजनमायतम् ।
अगच्छं जानकीं सीतां मार्गमाणो दिदृक्षया ॥८॥

तत्र लङ्केति नगरी रावणस्य दुरात्मनः ।
दक्षिणस्य समुद्रस्य तीरे वसति दक्षिणे ॥९॥

तत्र दृष्टा मया सीता रावणान्तःपुरे सती ।
संन्यस्य त्वयि जीवन्ती रामा राम मनोरथम् ॥१०॥

दृष्टा मे राक्षसी मध्ये तर्ज्यमाना मुहुर्मुहुः ।
राक्षसीभिर्विरूपाभी रक्षिता प्रमदावने ॥११॥

दुःखमापद्यते देवी तवादुःखोचिता सती ।
रावणान्तःपुरे रुद्ध्वा राक्षसीभिः सुरक्षिता ॥१२॥

एकवेणीधरा दीना त्वयि चिन्तापरायणा ।
अधःशय्या विवर्णाङ्गी पद्मिनीव हिमागमे ॥१३॥

रावणाद्विनिवृत्तार्था मर्तव्यकृतनिश्चया ।
देवी कथं चित्काकुत्स्थ त्वन्मना मार्गिता मया ॥१४॥

इक्ष्वाकुवंशविख्यातिं शनैः कीर्तयतानघ ।
स मया नरशार्दूल विश्वासमुपपादिता ॥१५॥

ततः सम्भाषिता देवी सर्वमर्थं च दर्शिता ।
रामसुग्रीवसख्यं च श्रुत्वा प्रीतिमुपागता ॥१६॥

नियतः समुदाचारो भक्तिश्चास्यास्तथा त्वयि ।
एवं मया महाभागा दृष्टा जनकनन्दिनी ।
उग्रेण तपसा युक्ता त्वद्भक्त्या पुरुषर्षभ ॥१७॥

अभिज्ञानं च मे दत्तं यथावृत्तं तवान्तिके ।
चित्रकूटे महाप्राज्ञ वायसं प्रति राघव ॥१८॥

विज्ञाप्यश्च नर व्याघ्रो रामो वायुसुत त्वया ।
अखिलेनेह यद्दृष्टमिति मामाह जानकी ॥१९॥

इदं चास्मै प्रदातव्यं यत्नात्सुपरिरक्षितम् ।
ब्रुवता वचनान्येवं सुग्रीवस्योपशृण्वतः ॥२०॥

एष चूडामणिः श्रीमान्मया ते यत्नरक्षितः ।
मनःशिलायास्तिकलस्त्वं स्मरस्वेति चाब्रवीत् ॥२१॥

एष निर्यातितः श्रीमान्मया ते वारिसम्भवः ।
एतं दृष्ट्वा प्रमोदिष्ये व्यसने त्वामिवानघ ॥२२॥

जीवितं धारयिष्यामि मासं दशरथात्मज ।
ऊर्ध्वं मासान्न जीवेयं रक्षसां वशमागता ॥२३॥

इति मामब्रवीत्सीता कृशाङ्गी धर्म चारिणी ।
रावणान्तःपुरे रुद्धा मृगीवोत्फुल्ललोचना ॥२४॥

एतदेव मयाख्यातं सर्वं राघव यद्यथा ।
सर्वथा सागरजले सन्तारः प्रविधीयताम् ॥२५॥

तौ जाताश्वासौ राजपुत्रौ विदित्वा
तच्चाभिज्ञानं राघवाय प्रदाय ।
देव्या चाख्यातं सर्वमेवानुपूर्व्याद्
वाचा सम्पूर्णं वायुपुत्रः शशंस ॥ २६ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com